[1]पृथग्योगकरणमस्य विधेरनित्यत्वज्ञापनार्थम्। 'तेन वित्तश्चुञ्चुप्चणपौ' (५.२.२६/१८२७)–केशचुञ्चुः, केशचणः। 'अवात्कुटारच्च' (५.२.३०/१८३१)[2], [3]'नते नासिकायाः सञ्ज्ञायां टीटञ्नाटज्भ्रटचः' (५.२.३१/१८३२)–अवटीटः[4]। [5]आदिः इत्येव। 'कर्मणि घटोऽठच्' (५.२.३५/१८३६)–कर्मठः ॥

## लशक्वतद्धिते। (८/१९५)

[6]तद्धितवर्जितस्य प्रत्ययस्यादितो वर्तमाना लकारशकारकवर्गा इत्सञ्ज्ञा भवन्ति। लकारः, '[7]ल्युट् च' (३.३.११५/३२९०)–चयनम्, [8]जयनम्। शकारः, 'कर्तरि शप्' (३.१.६८/२१६७)–भवति, [9]पचति। कवर्गः, 'क्तक्तवतू निष्ठा' (१.१.२६/३०१२)–भुक्तः, भुक्तवत्। 'प्रियवशे वदः खच्' (३.२.३८/२९५३)–प्रियंवदः, वशंवदः। '[10]ग्लाजिस्थश्च ग्स्नुः' (३.२.१३९/३११९)–[11]ग्लास्नुः, जिष्णुः, [12]भूष्णुः। 'भञ्जभासमिदो घुरच्' (३.२.१६१/३१४१)–भङ्गुरम्[13]। 'टाङसिङसामिनात्स्याः' (७.१.१२/२०१)–वृक्षात्, वृक्षस्य। अतद्धिते इति किम्? चूडालः (५.२.९६/१९०३)। [14]लोमशः (५.२.१००/१९०७)। कर्णिका (४.३.६५/१४४४) ॥

## तस्य लोपः। (९/६२)

[15]तस्य इत्सञ्ज्ञकस्य लोपो भवति। तथा [16]चैवोदाहृतम्। तस्यग्रहणं सर्वलोपार्थम्, 'अलोऽन्त्यस्य' (१.१.५२/४२) मा भूत् 'आदिर्ञिटुडवः' (१.३.५/२२८९) इति ॥

## यथासङ्ख्यमनुदेशः समानाम्। (१०/१२८)

सङ्ख्याशब्देन क्रमो लक्ष्यते। यथासङ्ख्यं यथाक्रममनुदेशो भवति। अनुदिश्यते इति अनुदेशः। पश्चादुच्चार्यते इत्यर्थः। समानां समसङ्ख्यानां समपरिपठितानामुद्देशिनाम[17]नुदेशिनां च यथाक्रम[18]मुद्देशिभिरनुदेशिनः सम्बध्यन्ते। 'तूदीशलातुरवर्मतीकूचवाराड्ढक्छण्ढञ्यकः' (४.३.९४/१४७४)। [19]प्रथमात् प्रथमः, द्वितीयाद् द्वितीयः इत्यादि। [20]तौदेयः। शालातुरीयः। वार्मतेयः। कौचवार्यः। समानाम् इति किम्? 'लक्षणेत्थम्भूताख्यानभागवीप्सासु प्रतिपर्यनवः' (१.४.९०/५५२)। लक्षणादयश्चत्वारोऽर्थाः[21], प्रत्यादयस्त्रयः, सर्वेषां सर्वत्र कर्मप्रवचनीयसञ्ज्ञा भवति। इह कस्मान् न भवति 'वेशोयशआदेर्भगाद्यल् (४.४.१३१/३४७७) ख च' (४.४.१३२/३४७८) इति? स्वरितेन लिङ्गेन यथासङ्ख्यम्[22]। यत्र नेष्यते, तत्र स्वरितत्वं न प्रतिज्ञायते। '[23]स्वरितेनाधिकारः' (१.३.११/४६) इति स्वरितग्रहणं पूर्वेणापि सम्बध्यते ॥

## स्वरितेनाधिकारः। (११/४६)

स्वरितेन इति इत्थम्भूतलक्षणे (२.३.२१/५६६) तृतीया। स्वरितो नाम [24]स्वरविशेषो वर्णधर्मः। तेन चिह्नेना[25]धिकारो वेदितव्यः। अधिकारो विनियोगः। स्वरितगुणयुक्तं शब्दरूपमधिकृतत्वादुत्तरत्रोपतिष्ठते। 'प्रतिज्ञास्वरिताः पाणिनीयाः' (व्या.प.१२२)। 'प्रत्ययः' (३.१.१/१८०)[26]। 'धातोः' (३.१.९१/२८२९)। 'ङ्याप्प्रातिपदिकात्' (४.१.१/१८२)। 'अङ्गस्य' (६.४.१/२००)। 'भस्य' (६.४.१२९/२३३)। 'पदस्य' (८.१.१६/४०१)[27] ॥

---

1. पृथग्योग–चणपौ नास्ति क. 2. अवकूटारः, अवकटः इत्यधिकम् क. 3. नते–कर्मठः नास्ति ग. 4. अवनाटः, अवभ्रटः इत्यधिकम् क. 5. आदिः–कर्मठः नास्ति क. 6. तद्धितवर्जप्रत्ययस्यादितो लकारशकारकवर्गा इत्संज्ञका अ. ड. 7. सूत्रमिदं नास्ति फ. 8. पवनम् अ. 9. पचति नास्ति अ. क. 10. सूत्रमिदं नास्ति ग. 11. ग्लास्नुः नास्ति ड. 12. भूष्णुः नास्ति फ. 13. भासुरम् मेदुरम् इत्यधिकम् ब. इ. क. 14. रोमशः ड. 15. इत्सञ्ज्ञस्य ड, यस्य इत्सञ्ज्ञा तस्य फ. 16. चैवमुदाहृतम् ड. 17. अनुदेशिनां नास्ति अ. 18. उद्देशिभिः सह अ. 19. वाक्यमिदं नास्ति अ. 20. तूदी अभिजनोऽस्य इत्यधिकम् क. ड. 21. अर्थाः नास्ति फ. 22. इष्यते इत्यधिकम् फ. 23. स्वरितादधिकारः ग. 24. स्वरदोषो न्या, स्वरविशेषो नास्ति प. मं, स्वरविशेषो वर्णधर्मः न स्वरधर्मः फ. 25. अधिकारे ब. 26. परश्च इत्यधिकम् फ. 27. इत्येवमादयः इत्यधिकम् ग.